Topic 78

## अदस् सर्वनाम पुँल्लिंग

पुंसोऽसुङ् ।

सर्वनामस्थाने विवक्षितेऽसुङ् स्यात् । पुमान् । हे पुमन् ! पुमांसौ । पुंसः । पुम्भ्याम् । पुंसु ।

ऋदुशनस् – इत्यनङ् – उशाना, उशानसौ ।

वा० – अस्य सम्बुद्धौ वाऽनङ्, नलोपश्च वा वाच्यः । हे उशान, हे उशानन्, हे उशानः ! हे उशानसौ ! उशनोभ्याम् । उशनस्सु । अनेहा । अनेहसौ । हे अनेहः ! वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ।

सर्वनामस्थान की विवक्षा में 'पुंस्' शब्द के स्थान पर 'असुङ्' आदेश होता है । 'असुङ्' में उकार उच्चारणार्थक तथा ङकार इत्संज्ञक है, अतः 'ङित्' होने के कारण यह आदेश 'ङिच्च' परिभाषा से पुंस् के अन्त्य वर्ण-सकार के ही स्थान पर होगा । उदाहरण के लिए सर्वनाम स्थान 'सु' की विवक्षा में 'पुंस' के सकार को असुङ् होकर, पुं अस् + स रूप बनता है । इस स्थिति में 'निमित्तापाये नैमित्तिकस्याप्यपायः' परिभाषा से अनुस्वार अपने पूर्वरूप मकार में परिणत होजाता है और रूप बनता है – 'पुम् अस् + स् । तब नुम्, अनुबन्ध-लोप, 'सान्तमहतः–०' से दीर्घ, सुलोप तथा संयोगान्तलोप करने से 'पुमान्' रूप सिद्ध होता है ।

अदस औ सुलोपश्च ।

अदस औत् स्यात् सौ परे, सुलोपश्च । तदोः सः–० इति सः – असौ । त्यदाद्यत्वम् । पररूपत्वम् । वृद्धिः ।

अदसोऽसेर्दादु दो मः ।

अदसोऽसान्तस्य दात् परस्य उदूतौ, दस्य मश्च । आन्तरतम्याद् ह्रस्वस्य उः, दीर्घस्य ऊः । ...

पुंसो

जश: शी । गुण: ।

एत ईद् बहुवचने ।

अदसो दात् परस्य ईद्, दस्य च मो बह्वर्थोक्तौ । अमी ।
'पूर्वत्रासिद्धम्' इति विभक्तिकार्यं प्राक्, पश्चादुत्वमत्वे ।
अमुम् । अमू । अमून् । मुत्वे कृते घिसञ्ज्ञायां 'ना' भावः ।

न मु ने ।

'ना' भावे कर्तव्ये कृते च मुभावो नासिद्धः । अमुना ।
अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः । अमुष्मात् ।
अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमीषु ।